শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

## শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে সুন্দরকাণ্ডে

# ॥ ষষ্ঠঃ সর্গঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ ষষ্ঠঃ সর্গঃ ॥

## হনুমতা রাৱণস্যান্যেষাং চ রক্ষসাং গৃহেষু সীতাযা অনুসন্ধানম্

স নিকামং ৱিমানেষু ৱিচরন্ কামরূপধৃক্।
ৱিচচার কপির্লঙ্কাং লাঘৱেন সমন্ৱিতঃ॥ **5.6.1** ॥

আসসাদা চ লক্ষ্মীৱান্ রাক্ষসেন্দ্রনিৱেশনম্।
প্রাকারেণার্কৱর্ণেন ভাস্ৱরেণাভিসংৱৃতম্॥ **5.6.2** ॥

রক্ষিতং রাক্ষসৈর্ভীমৈঃ সিংহৈরিৱ মহদ্ ৱনম্।
সমীক্ষমাণো ভৱনং চকাশে কপিকুঞ্জরঃ॥ **5.6.3** ॥

রূপ্যকোপহিতৈশ্চিত্রৈস্তোরণৈর্হেমভূষণৈঃ।
ৱিচিত্রাভিশ্চ কক্ষ্যাভির্দ্ৱারৈশ্চ রুচিরৈর্ৱৃতম্॥ **5.6.4** ॥

গজাস্থিতৈর্মহামাত্রৈঃ শূরৈশ্চ ৱিগতশ্রমৈঃ।
উপস্থিতমসংহার্যৈর্হযৈঃ স্যন্দনযাযিভিঃ॥ **5.6.5** ॥

সিংহৱ্যাঘ্রতনুত্রাণৈর্দান্তকাঞ্চনরাজতীঃ।
ঘোষৱদ্ভির্ৱিচিত্রৈশ্চ সদা ৱিচরিতং রথৈঃ॥ **5.6.6** ॥

বহুরত্নসমাকীর্ণং পরার্ধ্যাসনভূষিতম্।
মহারথসমাৱাপং মহারথমহাসনম্॥ **5.6.7** ॥

দৃশ্যৈশ্চ পরমোদারৈস্তৈস্তৈশ্চ মৃগপক্ষিভিঃ।
ৱিৱিধৈর্বহুসাহস্রৈঃ পরিপূর্ণং সমন্ততঃ॥ **5.6.8** ॥

www.prapatti.com

ৱিনীতৈরন্তপালৈশ্চ রক্ষোভিশ্চ সুরক্ষিতম্।
মুখ্যাভিশ্চ ৱরস্ত্রীভিঃ পরিপূর্ণং সমন্ততঃ॥ **5.6.9**॥

মুদিতপ্রমদারত্নং রাক্ষসেন্দ্রনিৱেশনম্।
ৱরাভরণসংহ্রাদৈঃ সমুদ্রস্ৱননিঃস্ৱনম্॥ **5.6.10**॥

তদ্ রাজগুণসম্পন্নং মুখ্যৈশ্চ ৱরচন্দনৈঃ।
মহাজনসমাকীর্ণং সিংহৈরিৱ মহদ্ ৱনম্॥ **5.6.11**॥

ভেরীমৃদঙ্গাভিরুতং শঙ্খঘোষৱিনাদিতম্।
নিত্যার্চিতং পর্ৱসুতং পূজিতং রাক্ষসৈঃ সদা॥ **5.6.12**॥

সমুদ্রমিৱ গম্ভীরং সমুদ্রসমনিঃস্ৱনম্।
মহাত্মনো মহদ্ ৱেশ্ম মহারত্নপরিচ্ছদম্॥ **5.6.13**॥

মহারত্নসমাকীর্ণং দদর্শ স মহাকপিঃ।
ৱিরাজমানং ৱপুষা গজাশ্ৱরথসঙ্কুলম্॥ **5.6.14**॥

লঙ্কাভরণমিত্যেৱ সোঽমন্যত মহাকপিঃ।
চচার হনুমাংস্তত্র রাৱণস্য সমীপতঃ॥ **5.6.15**॥

গৃহাদ্ গৃহং রাক্ষসানামুদ্যানানি চ সর্ৱশঃ।
ৱীক্ষমাণোঽপ্যসন্ত্রস্তঃ প্রাসাদাংশ্চ চচার সঃ॥ **5.6.16**॥

অৱপ্লুত্য মহাৱেগঃ প্রহস্তস্য নিৱেশনম্।
ততোঽন্যৎ পুপ্লুৱে ৱেশ্ম মহাপার্শ্ৱস্য ৱীর্যৱান্॥ **5.6.17**॥

অথ মেঘপ্রতীকাশং কুম্ভকর্ণনিৱেশনম্।
ৱিভীষণস্য চ তথা পুপ্লুৱে স মহাকপিঃ॥ **5.6.18**॥

মহোদরস্য চ তথা ৱিরূপাক্ষস্য চৈৱ হি।
ৱিদ্যুজ্জিহ্ৱস্য ভৱনং ৱিদ্যুন্মালেস্তথৈৱ চ॥ **5.6.19**॥

ৱজ্রদংষ্ট্রস্য চ তথা পুপ্লুৱে স মহাকপিঃ।
শুকস্য চ মহাৱেগঃ সারণস্য চ ধীমতঃ॥ **5.6.20**॥

তথা চেন্দ্রজিতো ৱেশ্ম জগাম হরিযূথপঃ।
জম্বুমালেঃ সুমালেশ্চ জগাম হরিসত্তমঃ॥ **5.6.21**॥

রশ্মিকেতোশ্চ ভৱনং সূর্যশত্রোস্তথৈৱ চ।
ৱজ্রকাযস্য চ তথা পুপ্লুৱে স মহাকপিঃ॥ **5.6.22**॥

ধূম্রাক্ষস্যাথ সম্পাতের্ভৱনং মারুতাত্মজঃ।
ৱিদ্যুদ্রূপস্য ভীমস্য ঘনস্য ৱিঘনস্য চ॥ **5.6.23**॥

শুকনাভস্য চক্রস্য শঠস্য কপটস্য চ।
হ্রস্ৱকর্ণস্য দংষ্ট্রস্য লোমশস্য চ রক্ষসঃ॥ **5.6.24**॥

যুদ্ধোন্মত্তস্য মত্তস্য ধ্ৱজগ্রীৱস্য সাদিনঃ।
ৱিদ্যুজ্জিহ্ৱদ্বিৱজিহ্ৱানাং তথা হস্তিমুখস্য চ॥ **5.6.25**॥

করালস্য পিশাচস্য শোণিতাক্ষস্য চৈৱ হি।
প্লৱমানঃ ক্রমেণৈৱ হনুমান্ মারুতাত্মজঃ॥ **5.6.26**॥

তেষু তেষু মহার্হেষু ভৱনেষু মহাযশাঃ।
তেষামৃদ্ধিমতামৃদ্ধিং দদর্শ স মহাকপিঃ॥ **5.6.27**॥

সর্ৱেষাং সমতিক্রম্য ভৱনানি সমন্ততঃ।
আসসাদাথ লক্ষ্মীৱান্ রাক্ষসেন্দ্রনিৱেশনম্॥ **5.6.28**॥

রাৱণস্যোপশাযিন্যো দদর্শ হরিসত্তমঃ।
ৱিচরন্ হরিশার্দূলো রাক্ষসীর্ৱিকৃতেক্ষণাঃ॥ **5.6.29**॥

শূলমুদ্গরহস্তাংশ্চ শক্তিতোমরধারিণঃ।
দদর্শ ৱিৱিধান্ গুল্মাংস্তস্য রক্ষঃপতের্গৃহে॥ **5.6.30**॥

www.prapatti.com

রাক্ষসাংশ্চ মহাকাযান্ নানাপ্রহরণোদ্যতান্।
রক্তান্ শ্বেতান্ সিতাংশ্চাপি হরীংশ্চাপি মহাজৱান্॥ **5.6.31** ॥

কুলীনান্ রূপসম্পন্নান্ গজান্ পরগজারুজান্।
শিক্ষিতান্ গজশিক্ষাযামৈরাৱতসমান্ যুধি॥ **5.6.32** ॥

নিহন্তৄন্ পরসৈন্যানাং গৃহে তস্মিন্ দদর্শ সঃ।
ক্ষরতশ্চ যথা মেঘান্ স্রৱতশ্চ যথা গিরীন্॥ **5.6.33** ॥

মেঘস্তনিতনির্ঘোষান্ দুর্ধর্ষান্ সমরে পরৈঃ।
সহস্রং ৱাহিনীস্তত্র জাম্বূনদপরিষ্কৃতাঃ॥ **5.6.34** ॥

হেমজালৈরৱিচ্ছিন্নাস্তরুণাদিত্যসন্নিভাঃ।
দদর্শ রাক্ষসেন্দ্রস্য রাৱণস্য নিৱেশনে॥ **5.6.35** ॥

শিবিকা ৱিৱিধাকারাঃ স কপির্মারুতাত্মজঃ।
লতাগৃহাণি চিত্রাণি চিত্রশালা গৃহাণি চ॥ **5.6.36** ॥

ক্রীডাগৃহাণি চান্যানি দারুপর্ৱতকানি চ।
কামস্য গৃহকং রম্যং দিৱাগৃহকমেৱ চ॥ **5.6.37** ॥

দদর্শ রাক্ষসেন্দ্রস্য রাৱণস্য নিৱেশনে।
স মন্দরসমপ্রখ্যং মযূরস্থানসঙ্কুলম্॥ **5.6.38** ॥

ধ্ৱজযষ্টিভিরাকীর্ণং দদর্শ ভৱনোত্তমম্।
অনন্তরত্নিনিচযং নিধিজালং সমন্ততঃ।
ধীরনিষ্ঠিতকর্মাঙ্গং গৃহং ভূতপতেরিৱ॥ **5.6.39** ॥

অর্চির্ভিশ্চাপি রত্নানাং তেজসা রাৱণস্য চ।
ৱিররাজ চ তদ্ ৱেশ্ম রশ্মিৱানিৱ রশ্মিভিঃ॥ **5.6.40** ॥

জাম্বূনদমযান্যেৱ শযনান্যাসনানি চ।

ভাজনানি চ শুভ্রাণি দদর্শ হরিযূথপঃ ॥ **5.6.41** ॥

মধ্বাসবকৃতক্লেদং মণিভাজনসঙ্কুলম্।
মনোরমমসম্বাধং কুবেরভবনং যথা ॥ **5.6.42** ॥

নূপুরাণাং চ ঘোষেণ কাঞ্চীনাং নিঃস্বনেন চ।
মৃদঙ্গতলনির্ঘোষৈর্ঘোষবদ্ভির্বিনাদিতম্ ॥ **5.6.43** ॥

প্রাসাদসঙ্ঘাতযুতং স্ত্রীরত্নশতসঙ্কুলম্।
সুব্যূঢকক্ষ্যং হনুমান্ প্রবিবেশ মহাগৃহম্ ॥ **5.6.44** ॥

॥ ইত্যার্ষে শ্রীমদ্রামাযণে বাল্মীকীযে আদিকাব্যে সুন্দরকাণ্ডে ষষ্ঠঃ সর্গঃ ॥

www.prapatti.com